www.shaivam.org

# મહામૃત્યુજયસ્તોત્રમ્

ધ્યાનમ્

ચન્દ્રાર્કાગ્નિવિલોચનં સ્મિતમુખં પદ્મદ્વયાન્તસ્થિતં
મુદ્રાપાશમૃગાક્ષસત્રવિલસત્પાણિં હિમાંશુપ્રભમ્ ।
કોટીન્દુપ્રગલત્સુધાપ્લુતતમું હારાદિભૂષોજ્જ્વલં
કાન્તં વિશ્વવિમોહનં પશુપતિં મૃત્યુજયં ભાવયેત્ ॥
રુદ્રં પશુપતિં સ્થાણું નીલકણ્ઠમુમાપતિમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧॥
નીલકન્ઠં કાલમૂર્ત્તિં કાલજ્ઞં કાલનાશનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૨॥
નીલકણ્ઠં વિરૂપાક્ષં નિર્મલં નિલયપ્રદમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૩॥
વામદેવં મહાદેવં લોકનાથં જગદ્ગુરુમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૪॥
દેવદેવં જગન્નાથં દેવેશં વૃષભધ્વજમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૫॥
ત્ર્યક્ષં ચતુર્ભુજં શાન્તં જટામકુટધારિણમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૬॥
ભસ્મોદ્ધૂલિતસર્વાઙ્ગં નાગાભરણભૂષિતમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૭॥
અનન્તમવ્યયં શાન્તં અક્ષમાલાધરં હરમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૮॥
આનન્દં પરમં નિત્યં કૈવલ્યપદદાયિનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૯॥
અર્દ્ધનારીશ્વરં દેવં પાર્વતીપ્રાણનાયકમ્ ।

નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૦।।
પ્રલયસ્થિતિકર્ત્તારમાદિકર્ત્તારમીશ્વરમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૧।।
વ્યોમકેશં વિરૂપાક્ષં ચન્દ્રાર્દ્ધકૃતશેખરમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૨।।
ગઙ્ગાધરં શશિધરં શઙ્કરં શૂલપાણિનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૩।।
ગઙ્ગાધરં મહાદેવં સર્વાભરણભૂષિતમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૬।।
અનાથઃ પરમાનન્તં કૈવલ્યપદગામિનિ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૪।।
સ્વર્ગાપવર્ગદાતારં સૃષ્ટિસ્થિત્યન્તકારણમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૫।।
કલ્પાયુર્દેહિ મે પુણ્યં યાવદાયુરરોગતામ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૬।।
શિવેશાનાં મહાદેવં વામદેવં સદાશિવમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૭।।
ઉત્પત્તિસ્થિતિસંહારકર્તારમીશ્વરં ગુરુમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ।। ૧૮।।
ફલશ્રુતિ
માર્કણ્ડેયકૃતં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ ।
તસ્ય મૃત્યુભયં નાસ્તિ નાગ્નિચૌરભયં ક્વચિત્ ।। ૧૯।।
શતાવર્ત્તં પ્રકર્તવ્યં સંકટે કષ્ટનાશનમ્ ।
શુચિર્ભૂત્વા પથેત્સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।। ૨૦।।
મૃત્યુંજય મહાદેવ ત્રાહિ માં શરણાગતમ્ ।
જન્મમૃત્યુજરારોગૈઃ પીડિતં કર્મબન્ધનૈઃ ।। ૨૧।।

તાવકસ્ત્વદ્ગતઃ પ્રાણસ્ત્વચ્ચિત્તોઽહં સદા મૃડ ।
ઇતિ વિજ્ઞાપ્ય દેવેશં ત્ર્યમ્બકાખ્યમનું જપેત્ ।। ૨૩।।
નમઃ શિવાય સામ્બાય હરયે પરમાત્મને ।
પ્રણતક્લેશનાશાય યોગિનાં પતયે નમઃ ।। ૨૪।।
।। ઇતિ શ્રીમાર્કણ્ડેયપુરાણે માર્કણ્ડેયકૃત મહામૃત્યુજયસ્તોત્રં સંપૂર્ણમ્ ।।
www.shaivam.org